रचय ।
"पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः ।"
इति यदि समूलं तदा शाखान्तरीयम् । एतेन विष्टरे पञ्चविंशतिसंख्या भवदेवभट्टोक्ता निरस्ता । एवं विष्टरग्रहणं हस्ताभ्यामपि यदुक्तं तदपि निरस्तम् ।
"यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ॥"
इति छन्दोगपरिशिष्टात् । इति संस्कारतत्त्वम् ॥
विष्टरश्रवाः, [स्] पुं, ("विष्टराविव श्रवसी यस्येति ।" शिशुपालवधस्य १४ । १२ । टीकायां मल्लिनाथः । "विष्टरेऽश्वत्थवृक्षे श्रूयते नित्यं तत्र वसतीति ।" उणा० ४ । २२६ । इत्यत्र उज्ज्वलदत्तः । ) विष्णुः । इत्यमरः । ( यथा, हरिवंशे भविष्यपर्व्वणि । ५१ । १७ ।
"उत्पाद्य वचं दैत्येन्द्रः शतशाखं महाशिरम् ।
तेन तं योधयामास विष्टरश्रवसं प्रभुम् ।")
विष्टरा, स्त्री, गुड्डासिनी । इति राजनिर्घण्टः ॥
विष्टरहा, स्त्री, स्वर्णकेतकी । इति राजनिर्घण्टः ॥
विष्टारहा इति च कश्चित् पाठः ।
विष्टारः, पुं, छन्दोविशेषः । यथा, विष्टारः पङ्क्तिश्छन्दः । इति षत्वप्रकरणे दुर्गादासः ॥
विष्टिः, स्त्री, ( विष् + क्तिन् । ) वेतनं विना हठाद्द्वारोद्वहनादिक्लेशः । वेगार इति ख्यातः । तत्पर्य्यायः । आजूः २ । इत्यमरः । हठाद्भृतिकः क्लेशो विभातरूपो विष्टिरिति भट्टस्वामी । द्वे वेतनमन्तरेण कर्म्मकरणे कर्म्मकारिणि चेत्यन्ये । किन्तु कर्म्मकरे विष्टिः स्त्रियामभृतिकर्म्मणीति रुद्रः । इति भरतः ॥ ● ॥ ( यथा, रामायणे । २ । ८२ । २० ।
"विष्टिकर्म्मान्तिकाः सर्व्वे मार्गशोधकरक्षकाः ।")
वेतनम् । कर्म्म । इति मेदिनी । टे, २६ ॥ (यथा, भागवते । ७ । ८ । ५५ ।
"वयमीश किन्नरगणास्तवानुगा
दितिजेन विष्टिममुनानुकारिताः ।")
भद्रा । कर्णम् । इति विश्वः ॥ प्रेषणम् । इति हेमचन्द्रः । सा च भद्रा तिथ्यादेकादशकरणान्तर्गतसप्तमकरणं पञ्जिकायां तस्या अङ्कं शून्यम् । यथा,—
"ववबालवकौलवतैतिल
गरवणिजाः सविष्टयः सप्त ।
शकुनिचतुष्पन्नागाः
किन्तुघ्न ध्रुवाणि करणानि ॥
शुक्लादितिथिविशेषार्द्धात् प्रथमे तत्तृतीयके ।
आद्यन्तार्द्धात् क्रमेण स्युरष्टावृत्त्या ववादयः ॥
एकादश्याचतुर्थ्योश्च शेषार्द्धे शुक्लपक्षके ।
अष्टमीपौर्णमास्योश्च पूर्व्वार्द्धे विष्टिरीरिता ॥
कृष्णपक्षे तृतीयाया दशम्याश्च परार्द्धतः ।
सप्तम्याश्च चतुर्द्दश्याः पूर्व्वार्द्धे विष्टिसम्भवः ॥
विवाह विधवौनादि विष्टिं सर्व्वत्र वर्ज्जयेत् ।
विष्टिशेषे विरक्ते हि पुच्छे कार्य्यं जयावहम् ॥"
कर्म्मप्रकाशे ।
"नाड्यस्तु पञ्च वदनं गलकस्तथैका
वक्षो दशैकसहिता नियतं चतस्रः ।
नाभिः कटिः षड्थ पुच्छलता च तिस्रो
विष्टेर्भवं निगदितोऽङ्गविभाग एषः ॥
मुखे कार्य्यध्वस्तिर्भवति मरणं चाथ गलके
धनध्वान्तिर्वक्षस्यथ कटितटे बुद्धिविलयः ।
कलिर्नाभीदेशे विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः एवमिति फलं पूर्व्वमुनयः ॥
मनुवसुमुनितिथियुगदश०
शिवगुणसंख्यासु तिथिषु पूर्व्वान्याः ।
१४।८।७।१५।४।१०।११।३।
आयाति विष्टिरेषा एष्टे शुभदा पुरस्तशुभदा ॥"
पूर्व्वान्याः पूर्व्वाशादिदिङ्मुखी भवति इत्यर्थः ॥
"एकेन हीना द्विगुणा तिथिस्तु
समाष्टशिष्टं करणं ववादि ।
पूर्व्वे परेऽप्येवमयं विशेषो
दिसंयुता चन्द्रविवर्ज्जिता च ॥
किन्तुघ्नसंज्ञं करणं प्रदिष्टमादेकिंतिथेरादिदले सदैव ।
उपान्त्यशेषे शकुनिस्तु दर्शे
पूर्व्वे चतुष्पादपरे च नागः ॥
इन्द्रकमलजमित्रार्य्यमभूश्रियः क्रमशा ववादेः ।
कलिदृषपणिमारुताः पतयः शकुन्यादेः ॥"
ववाद्यधिपकथनम् ॥
"पौष्टिकस्थिरशुभानि ववाख्ये
बालवे द्विजहितान्यपि कर्म्म ।
कौलवे प्रमदामित्रविधानं
तैतिले सुभगताश्रयकर्म्म ॥
गरे च वीजाश्रयकर्षणानि
वणिज्यपि स्थैर्य्यवणिक्क्रिया च ।
न सिद्धिमाप्नोति कृतञ्च विष्टौ
विषाभिघातादिषु तत्र सिद्धिः ॥
मन्त्रौषधानि शकुनौ च सपौष्टिकानि
गोविप्रराज्यपितृकर्म्म चतुष्पदे तु ।
सौभाग्यदारुणकृतिद्विपकर्म्मनागे
किन्तुघ्नकानि शुभपौष्टिकमङ्गलानि ॥"
इति ज्योतिस्तत्त्वम् ॥
( यथा, कलाविलासे । २ । ११ ।
"कश्चिद्वदति सखेदं द्रविणं निःचिन्त्य हन्तमन्नास्मि ।
भालःपरं प्रभाते विष्टिदिनं किं करोम्यद्य ॥")
विष्टिः, त्रि, ( विष् + क्तिच् । ) कर्म्मकरः । इति मेदिनी । टे, २६ ॥
विष्ठलं, क्ली, ( विदूरं स्थलम् । ) दूरस्थानम् । यथा । विकुशमिपरिभ्यः स्थलस्य । एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलं कुष्ठलं शमिष्ठलं परिष्ठलम् । इति सिद्धान्तकौमुदी ॥
विष्ठा, स्त्री, (विविधप्रकारेण तिष्ठति उदरे इति । वि + स्था + कः । उपसर्गादिति षः । ) विविधप्रकारेणोदरे तिष्ठति या । तत्पर्य्यायः । उच्चारः २ अवस्करः ३ शमलम् ४ शकृत् ५ गूथम् ६ पुरीषम् ७ वर्च्चस्कम् ८ विट् ६ । इत्यमरः ॥ वर्च्चः१० । इति जटाधरः ॥ अमेध्यम् ११ दूष्यम् १२ कल्कम् १३ मलम् १४ । इति शब्दरत्नावली ॥ किट्टम् १५ पूतिकम् १६ । इति राजनिर्घण्टः ॥ (यथा,—
"गुरोर्हितं प्रकर्त्तव्यं वाङ्मनःकायकर्म्मभिः ।
अहिताचरणादेव विष्ठायां जायते क्रिमिः ॥"
इति लक्ष्मणानन्दीयतन्त्रसारे ॥)
तद्दर्शननिषेधो यथा,—
"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ।
न च मूत्रं पुरीषं वा न च संस्पृष्टमैथुनम् ॥"
जले तदुत्सर्गनिषेधो यथा,—
"नाप्सु क्रीडेन्न धावेत नाप्सु विण्मूत्रमाचरेत् ।
नोच्छिष्टः संविशेन्नित्यं न नग्नः स्नानमाचरेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
तदुत्सर्गविधानं पुरीषशब्दे:तत्सम्बन्धयोर्द्रष्टव्यम् ॥
विष्णुः, पुं, अग्निः । इति शब्दमाला ॥ शुद्धः । वसुदेवता । इति धरणिः ॥ ( द्वादशादित्यानामन्यतमः । यथा, महाभारते ।१।६५।१६।
"एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥")
धर्म्मशास्त्रकर्तृमुनिविशेषः । यथा,—
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥"
इति याज्ञवल्क्यसंहिता ॥
नारायणो रूपविशेषः । तस्य व्युत्पत्तिर्यथा । वेवेष्टि व्याप्नोति विश्वं यः । वेवति सिञ्चति आप्यायते विश्वमिति वा । विष्णाति वियुनक्ति भक्तान् मायापसारणेन संसारादिति वा । विशति सर्व्वभूतानि विशन्ति सर्व्वभूतानि अत्रेति वा ।
"यस्माद्विश्वमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात् ॥"
इति विष्णुपुराणम् । इत्यमरटीकायां भरतः ॥ ("बृहत्वात् विष्णुरुच्यते ।" इति महाभारते । ५।७०।३।) तत्पर्य्यायः । नारायणः २ कृष्णः ३ वैकुण्ठः ४ विष्टरश्रवाः ५ दामोदरः ६ हृषीकेशः ७ केशवः ८ माधवः ६ स्वभूः १० दैत्यारिः ११ पुण्डरीकाक्षः १२ गोविन्दः १३ गरुडध्वजः १४ पीताम्बरः १५ अच्युतः १६ शार्ङ्गी १७ विष्वक्सेनः १८ जनार्द्दनः १९ उपेन्द्रः २० इन्द्रावरजः २१ चक्रपाणिः २२ चतुर्भुजः २३ पद्मनाभः २४ मधुरिपुः २५ वासुदेवः २६ त्रिविक्रमः २७ देवकीनन्दनः २८ शौरिः २९ श्रीपतिः ३० पुरुषोत्तमः ३१ वनमाली ३२ बलिध्वंसी ३३ कंसारातिः ३४ अधोक्षजः ३५ विश्वम्भरः ३६